No. ६४१ - घ

Title लौकिकन्यायसंग्रहः

Author रघुनाथवर्मा

Extent ७८ Age

Subject वेदान्तशास्त्रम् . सम्पूर्णम्

नं० ६४१-घ

लौकिकन्यायसंग्रहः

पत्राणि ७८ (सम्पूर्णम)

नं० ५५१-ध

लिपिक: रघुनाथ वर्मा

७८ ०ग्राहि

नं० ६४१-घ

लौकिकन्यायसंग्रहः (वेदान्तशास्त्रम्)

पत्राणि ८० ट (सम्पूर्णम्)

लिपिकः रघुनाथवर्मा

नं० ६४१-च.

लौकिकन्यायसंग्रहः प०७८ श्लो२८०० (वेदान्तशास्त्रम्)

पत्राणि ७८ (सम्पूर्णम्)

कर्त्ता रघुनाथवर्मा

लौ॰
न्या॰
१

ॐ श्रीगणेशाय नमः ॥ यत्कीर्तिप्रभया समुज्ज्वलभुवने मायाप्रभावैः प्रभो र्नीलादेर्जनिताप्रतीतिरचला
यैः संहृता शोभते यच्छिष्योडुगणैः समेत्य हृदयं हार्दान्धकारापहः श्रीमद्रामसुधालतिं उरमतो मो
दाय भूयात्सदा १ नत्वा शंभुं हरिं गौरीं विधिं विघ्नं च भारतीम् क्रियते रघुनाथेन लौकिकन्यायसंग्र
हः २ लौकिकन्यायरत्नानामाकरे यस्तु दर्शितम् तस्य संक्षेपपर्वेह शीघ्रं बोधाय दर्श्यते ३ न्यायार्थे वि
षये चैवोदाहृतिं च यथामति वदिष्यामोत्र संक्षेपाद्विस्तरादपि च क्वचित् ४ प्रसंगादागतान्नानान्याया
न्नोत्र विस्तरैः ग्रंथमात्रे वदिष्यामः क्वचिदन्यानुदाहृतिं ५ प्रसंगादागतानापि निगदव्याख्यानविषया
न तेषां व्याख्यास्यते पुनरस्मत्कृतात्स्वविरलाः पुनर्व्याख्यास्यन्ते विषयकथनादिष्वविज्ञताः प्रत्येकं को
शिष्टुनरपि वदिष्यामि विषये ६ उदाहृतिं वदिष्यामः प्रायो वेदान्तशास्त्रगाम् मीमांसान्यायगां क्वापि त
त्क्वापि विद्यापरशास्त्रगाम् ७ आम्नायशिरसामस्मान्निबंधत्वेन तावता स्याद्विशेषाख्यातमाहात्म्यं समाश्र
यात् ८ पंचीकृतस्य भूम्यादेः पृथिवीत्वादिकं यथा आम्नायान्तनिबंधत्वे तथास्यस्याद्विशेषकम् ९ प्रसा
धारणं धर्मस्य गयवत्वादिकस्य वै उपलंभात्तथापि वै येन तेनैवात्रापि विवादितम् ११ शास्त्रैकदेशसं
बंधं शास्त्रकार्यांतरे स्थितम् इति लक्षणसंबंधो विद्यते ग्रंथतो ध्रुवम् १२ उपासनाः क्रियाद्रूपाः स्ज्ञत
तेषु तथाकरे हृत्पद्मे हितथाप्यसौ वेदान्तत्वं यथा ध्रुवम् १३ यथा वाक्यनिबंधेषु बहुष्वप्यन्यगोचरः
विचारो दृश्यते तद्वद्वत्रापि कान्ततिः १४ समेन्वपि मीमांसा हि स्मृत्येमीमांसत्ववद्ध्रुवम् मुमंतसनि

वंधत्वे निर्बंधस्यास्य गम्यन्नाम १५ तत्तदीयैरनुबंधैर्विदं स्यादनुबंधवत् तदीयाः केनुबंधाः स्युरिति चेत्त्व
मवेहितान् १६ स्याद्वेदोपनिषन्नामकं दृश्यं काण्डं उत्तरः वेदान्तस्तदनुग्राहि सूत्रभाष्यादिकं तथा १७
अधिकारी स विषयः संबंधः सप्रयोजनः अनुबंधा इति ख्याताश्चत्वारः सन्ति शास्त्रगाः १८ अधीतवेदवेदा
न्तोऽल्पधातब्रह्मबोधवान् बहुजन्मार्जितैः पुण्यैः समन्वाराधितेश्वरः १९ ब्रह्म नित्यमनित्यं तज्जगदेवं वि
वेचकः ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा २० यत्नेन मनसो नित्यं विषयेभ्यो निवर्तकः तेभ्यो बा
ह्येन्द्रियाणां च बलादाकर्षकः सदा २१ उभयेषां निग्रहाणां तथा स्थापनयत्नवान् शीतोष्णसुखदुःखानां
तथा मानापमानयोः २२ सहिष्णुः श्रवणादौ च सर्वदैव समाहितः गुरुवेदान्तवाक्येषु केवलाद्वैत
वृत्तिषु २३ दृढविश्वासवान्धीरः सत्यवादी दयानिधिः अहं बद्धो विमुक्तः स्यां कथमेवं वितर्ककः २ ४
वेदान्तेष्वधिकारी स्यादेतेनैतैर्विनिश्चितः तद्विषयस्तु जीवस्य स्यात्तस्याभेदः परात्मना २५ तेनैव तस्य
तात्पर्येनास्यैवं विनिश्चितेः स एव विषयस्तस्य मायाविद्भिर्विनिश्चितः २६ यत्परः शब्द इत्यादेर्न्यायादस्य
अवस्थितिः गंगायां घोष इत्यादि लौकिकेष्वपि दृश्यते २७ प्रयोजनवती ह्युक्ता तात्पर्यं हि विनिश्चितं
स्वाध्यायस्य विधेर्नूनं नैविरोधोऽन्यथा भवेत् २८ तच्च प्रयोजनं ब्रह्माद्वैतज्ञानेन सिध्यति ब्रह्मविद्ब्रह्मैव
भवेत्यादिशास्त्रानुशासनात् २९ न भेदे तस्य तात्पर्यं सिद्धत्वात्सममानतः प्रयोजनविहीनत्वान्निंदितत्वा
च्च सर्वथा ३० मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति अल्पमप्यन्तरं कुर्वन्विमेतीति श्रुतौ श्रुते ३१

लौ॰ प्रधानादीनतामर्थ्यं शक्तेः किंत्वनुरात्मनि उपक्रमोपसंहारस्तु वैर्लिंगैर्विनिश्चयात् ३२ मतान्तरनिरा
भा॰ सेनस्यैतदर्थप्रपंचनम् भविता येनदेतस्य विस्तराद्उपरम्यते ३३ प्रतिपाद्यमथैक्यस्य जीवात्मपरमा-
२ त्मनोः वेदान्तानां च संबंधो बोध्यबोधकता विदुः ३४ तेषामेकत्वबोधेनामायामोसादकता तथा प्रयोज
कमथैकत्वसंबंधः शास्त्रमोतयोः ३५ द्वैतमद्वैतभावस्य संबंधो मोक्षबाधयोः संबंधोऽभिमतोऽभि
तैकत्वभेदेषु स्वतविधः ३६ अद्वैतावस्थकस्यास्य मूलाज्ञानस्य बाधने सविलासस्य संप्राप्तिश्चानंदस्य प्रयोजने ३७
कल्पितस्येनिवृत्तिश्च नाधिष्ठानातिरेकिनी रज्जुसर्पनिवृत्तिस्त्वन रज्जोरतिरिच्यते ३८ प्राप्तस्यानात्मतया तस्य
प्राप्तत्वेन च सर्वदा कण्ठचामीकरन्यायाप्राप्त्यामिकपचर्यते ३९ ब्रह्मैव सन्नेवं ब्रह्माप्नोतीति श्रुतेरुक्त
तम् विमुच्यते विमुक्तस्य निवृत्तस्य निवर्तते ४० अत्केचेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् इष्टार्थस्य हि सं
प्राप्तौ को विद्वान्यत्नमाचरेत् ४१ इतिन्यायं समाश्रित्य तुर्ई तृप्तिकृतादयः प्राप्ताः संप्राप्तिरत्नाः स्युः श्रुतिर
न्यायसमाश्रयात् ४२ अनाद्यविद्ययात स्याद्वृत्तेः सोऽप्राप्तवद्भवेत् विद्ययातन्निवृत्तौ तु प्राप्तइत्युपचर्यते ४३
स्वाधिष्ठानातिरेकेण न सत्ता कल्पितस्य वै विद्ययातन्निवृत्तिस्तु रूपवारादितिनिश्चित ४४ स्ववाहो कल्प्य
मानस्य भुजगस्य निवर्तनम् न दृष्टंवस्तुतो लोके दण्डादेर्वा सुसर्पवत् ४५ श्रुतस्य हि विधेयपि स्यादेकरूप
प्रयोजनं आत्मरूपेण संस्थानं ततः सिद्धं प्रयोजनम् ४६ संक्षेपेणानुबन्धाहि श्रोतारः प्रोक्ताययामति
तदनुग्राहिसूत्रादेस्तत्पवैवं विनिश्चित ४७ तथातस्य निबंधानामनुबंधास्तपवव अस्यास्येतन्निबंधना

द्वन्द्वबंधाभवेदिति ४८ अत्र सर्वत्र निर्बंधपरं प्रकरणपरं ननु किमिदं सूत्रादेः कृत्स्नग्राहित्वं तद्धीबबो
धहेतुत्वमिति चेन्न तत एव तत्संभवेन तद्वैयर्थ्यात् अन्यथा विषयासिद्धेर्विचारानुपपत्तेः स्वीकृतेदमेकत्व
स्य तत्त्ववेदान्तविषयएव न संभवति जीवब्रह्मैक्यस्य तद्विषयत्वाद्धि विरुद्धधर्मकयोस्तयोस्तदयोगादिति उच्य
ते यद्यपि वेदान्तेभ्य एव तत्प्रमा जायते तथापि तेषां परपरिकल्पितार्थान्तरपरत्वसंशयादसंभावनादि
प्रकृष्टदोषप्रतिबंधवशात्सा प्रमा सामग्र्या जायमानापि सा नाविद्यानिवर्तनक्षमा किन्तु मननोत्थज्ञान
साहाय्येनाप्रतिबद्धैव भवति अतस्तादृशप्रतिबंधनिरासेन प्रमाणतत्प्रमायाः प्रमितेः स्वविषयप्रतिष्ठत्वस्थि
रीकरणाय विचारशास्त्रमारंभणीयं यत्तु विरुद्धधर्माक्रान्तता जीवब्रह्मणोरैक्यासंभव इति तन्न विरोध
स्य भेदाधीनतया तदसिद्धावसिद्ध्या अद्वैतवादिनं प्रति स्वरूपासिद्धेः अनुमानेन श्रुतिबाधायोगाच्च किंच
सर्वमानोपजीव्यप्रसक्तविरोधेऽप्यागमस्यैव प्राबल्यमित्युत्सर्गः तथा च तन्मात्रोपजीविनो वराकस्या
नुमानस्य का कथा तथा च स्मृतिः प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति तथा च न विषयविचारयोर
सिद्धिरिति सिद्धं नूतनत्वात् किं कोऽप्यापि तद्गुणकं निराकरणेन मंदानवगाहभाष्ययुक्तितात्पर्यवर्णने
नव प्रकरणस्य साफल्यम् अस्य तु प्रकरणान्तरैस्तुल्यत्वादन्तरविषयोऽदिमत्त्वेपि सर्वशास्त्रेतिहासपु
राणसाहित्यव्याकरणकाव्यनाटकाख्यायिकादिषु वर्तमानदुरवगाहस्य लौकिकन्यायनिचयार्थविषया
ग्रहाटनेन सर्वोपकारित्वादवश्यारभ्यत्वम् परमविषयादयो यद्यपि प्रकरणान्तरशास्त्रीया एव तथापि

वे॰ सा॰ २ 3

प्रकरणत्वादेवावान्तरविषयादयः संक्षेपेण तच्चसारं निरूपयत्तत्त्ववाक्याद्यधिकारी सगुणनिर्गुणरूपविषयभेदे
विहाय निर्गुणमात्रमिह विषयः शास्त्रैकदेशसंबद्धमिति शेषेण संगृहीतः तन्मात्रावधारणमतिगूढत्वात्
त्वतात्पर्यग्राहकेनेन वक्त्रा किं कोऽज्ञावितिशास्त्रतात्पर्यपरिपन्थिकुतर्कनिराकरणं वा अवान्तरप्रयोजनं शेषे
ण संगृहीतं सर्वं यस्य विषयानुरूपमित्यलं प्रपञ्चनेन अथ व्याख्येयमार्यव्याख्यानमारभ्यते तत्र तावत्सा
यसमके शायस्यैव पदार्थशोधनं ततोऽहमेतत्प्रकमनन्यायेन तत्पदार्थशोधनपरः सर्ववाक्यार्थनिरूप
णं भविष्यति स्थूणानिखननसिंहावलोकनन्यायाभ्यामुक्तार्थदार्ढ्याय तद्विरुद्धमतान्तरनिरासाय
चोत्तरग्रन्थप्रवृत्तिः यत्रातिसूक्ष्मार्थज्ञापनाय क्रमेण तत्समीपः समीपतरः समीपतमश्चार्थस्तत्र यो
च्यते तत्रास्थूलारुन्धतीन्यायोऽवतरति यथा ध्रुवमरुन्धतीं च दर्शयतीति विधिबलाद्वधूं दर्शि
नेमामेकांतिसूक्ष्मायास्तस्याः झटिति प्रदर्शयितुमशक्यतया तावत्स्थूलं तत्त्वेन वदन्ति ततस्तदन्तरास्त
त्समीपस्थास्तारकाः ततः सप्तर्षिसंज्ञकाः समीपतराः ततः समीपतमं वसिष्ठतत्त्वेनोक्तामेव तत
या बोधयन्ति तथा स्थूलदेहादीनात्मानमिव मन्यमानाः प्राकृताः देहे नष्टे नष्टोऽहमिति क्रोशन्तो दृश्यन्तेऽता
न्बोधयन्ती श्रुतिः आत्मा वै जायते पुत्र इति तावत्पुत्रमात्मत्वेन वदति ततोऽप्यधीः पुत्रात्मत्वमापद्य वस्यावि
तिसत्वापगमे पुरुषोऽन्नरसमय इति देहमात्मानं वदति ततो देहमेवात्मानं न जानीयादिति तात्पर्यवती
श्रुतिस्ते ह प्राणाः प्रजापतिं पितरमेत्योचुरित्यादिना श्रोत्रादीनां चेतनत्वं सूचयन्ती तदविनाभूतमात्म

त्वेसत्त्वपत्ति नचैवशुनरमोन्तरात्माप्राणमयइतिप्राणात्मत्वेऽभ्युक्ते इंद्रियात्मत्वनिरासःकृतइतिवेदसंभवा
दितिगर्हणाणांतन्मयदायस्यात्मत्वे एकाभावेदेहस्यनिरात्मत्वापत्तिः नचैकस्यविनाशेऽवशिष्टस्यतु
त्वस्यात्मत्वेपिकस्यविनिर्गतोनाशेप्यवशिष्टतन्त्वंदेसएवायेपटइतिवदति साम्प्यात्मस्यभिन्नानांविरुद्ध
त्वे पारिषदन्यायेनवचनकार्यनिर्वाहोपीतिशंक्य उत्तरंदेहस्यपूर्वंस्मादिद्विनत्वयापूर्वेणानुभूतस्यान्तरे
णाप्तेः नान्यदृष्टंस्मरत्यन्यइतिन्यायात् एकस्यैकस्यचिदात्मत्वेतद्विनिर्गमनाविरहेणाशंक्यत्व
त्वे तेषांप्रत्येकंभोक्तृत्वेस्यात्तेऽपिचबहूनामेकामत्यासंभवेनविरुद्धदिक्क्रिययाबद्धत्वेकाकृष्टस्यगमना
येनदेहोन्मथनप्रसंगः ५ नचैवंयोगिन्यायेनैकामत्यैकदाविन्नत्वेपिसदातदसंभवात् एकस्य
प्राधान्योपगमेत्वतस्यैवात्मत्वंयुक्तं स्वामिभृत्यभावस्यदेहभेदव्याप्तत्वान्नैकस्वामिभृत्यन्यायस्याप्र
वृत्तेः तस्मात्युक्ताकृत्स्नातेन्द्रियात्मत्वधीनिरासायप्राणस्यात्मत्वोक्तिः प्राणेपितन्निरासायान्योन्तरात्मा
मनोमयइतिवदति एवंमनोन्तरात्माविज्ञानमयोन्योन्तरात्मानन्दमयइत्यादावपिबोध्यम् ततःउ
आनन्दमयान्तानामनात्मत्वदर्शनाय नीश्रुतिर्निर्विशेषात्मतत्त्वमेवात्मत्वेनदर्शयति तथाहिकश्चि
द्धीरःप्रत्यगात्मानमैक्षत् अस्थूलमनण्वह्रस्वमदीर्घमचक्षुरश्रोत्रं अप्राणोह्यमनाःशुभ्रः अनेनास्मा
त्माविश्वरूपोऽकर्तानचास्तिवेत्ताममचित्सदाहंचिन्मात्रोहंसदाशिवः एषतआत्मासर्वान्तरइत्याद्याः
श्रुतयोऽनादिभवानुवर्तमानचार्वाकादिभ्रमसिद्धस्यप्रकृतन्यायेनशुद्धाद्वैततत्त्वस्यमत्त्वधीनिवेशा

वे॰ सा॰ ध ५

यत्पूर्वोक्तश्रुत्याभासानुदितस्वप्रज्ञायात्मत्वस्य बाधपूर्वकमात्मतत्त्वं प्रतिपादयेति किंच प्रत्यगात्मत्वश्रुतेर्गौण
त्वं स्पष्टमेव भेदप्रसिद्धेः नेह प्राणा इत्यादिश्रुतेर्गौणत्वादिशाब्दात्मत्वे देवतापरा इति स्पष्टमाकरदर्पणे अन्नम
याद्यानन्दमयान्तश्रुतेर्मुञ्जादिषीकोद्धरणन्यायेन सर्वान्तरब्रह्मप्रत्यक्शब्दार्थसर्वबाधावधिभूतात्म
तत्त्वप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तस्याः स्वार्थपरत्वं प्रत्यगात्मत्वादिश्रुतीनां तूपक्रमादिलिंगैः
स्वार्थपरत्वात्प्राबल्यम् प्रयोगश्च प्रज्ञायानेंद्रमयोत्मेजगनात्मादर्पणवाहटवदिति आत्मा स्वेतरचैतन्य
भास्यः पदार्थत्वादित्यादि न्यायानुमानं त्वसदेव तद्धि दितादयोः विदितादिसादिश्रुतिबाधितं ज्ञानेऽनैकान्तिकं
च ज्ञानमपि वेद्यं चेत्स्ववेद्यत्वे आत्माश्रयः परवेद्यत्वेऽनवस्था प्रत्यक्षको दोषो मूलक्षयाभावात्। न। यदे
वनत्त्वायत्ने तद्वा समप्पयते एवं तद्द्वयमपीति सर्वेषां गड्डलिकाप्रवाहन्यायेनाप्रामाणिकत्वप्रयुक्ता
सत्त्वलक्षणान्धकूपपतनं स्यात् ततश्च कथं न मूलक्षयप्रयुक्तो जगदान्ध्यरूपदोषः फलम् तस्मादुक्ता
दीतरक्तत्वमाली वेदान्तैः प्रकृतन्यायेन बोध्यत इति सिद्धम् पंचकोशावतरणन्यायस्तु श्रुतिमात्रसिद्ध
त्वान्न लौकिकः एतन्न्यायविषयप्रयोजनं च तथाहि ये स्थूलदेहादयः श्रुत्यान्नमयादिशब्दैः कोशत्वेन
कोशावत्खङ्गमिवात्मानं दावरकतयाक्लेशहेतुत्वात्कोशा इत्युच्यन्ते तत्र पंचीकृतभूतोत्पन्नः स्थूलदेहोऽ
न्नमयकोशः पंचीकरणं तु विभागशक्तिरीशः एकैकं भूतं द्विधा यतेषु पञ्चभागानेकैकं चतुर्धा विधाय
तेषां स्वस्वद्वितीयभागान्स्थूलभागेषु योजयति एवं च तेषु एकैकं पंचपंचात्मकं भवति तेषु वियदादि

यवहारस्तन्महत्त्वाग्रामन्यायेन स्वांशाधिक्यात् नन्वत्र गुणानोक्तं तारतम्ये दृश्यांशेषु भूतपंचक इत्यार्योक्ते स्तन्नू
लेति हासादेस्त्वव्योमादि दृशामांशस्यामध्ये वाय्वादेरितिगम्यते तथा चाकाशादृष्टमांशस्यापि वाय्वादिसर्वां
शापेक्षयाप्याधिक्यात्सर्वत्रनभ्यवहारापत्तेरिति उच्यते न्यूनाधिकभावो हि व्यासाङ्गेष्वेष्ठ न भूतभूते
ष्ववनान्तर्गतेषु सत्रूपलंभात् यथाहुः ब्रह्माण्डावरणेष्वेषां न्यूनाधिकविचारणेति तानि वा पंचीकृ
तान्येवेति वसिष्ठादौ प्रश्नितं यथा च स्वांशाधिक्यात् तत्तद्व्यवहारयोग्यानि स्युस्तथैव मेलितानि यत्र
क्वचित्समे विभज्येति पाठः तत्र सममिति सपादायात् यद्वा सममंततद्देशाधिक्यात् तत्तद्व्यवहारयोग्यं
यथा स्यात्तथेति समर्थनीयं एवं हि व्योम्नि शब्दोऽभिव्यज्यते वायौ स्पर्शोऽपि वोध्यम् न च सर्वत्र सर्वे
ऋतोनाभिव्यज्यंते अभिव्यंजकस्य पंचीकरणस्य साम्यात् तस्य प्रागविद्यमानगुणाभिव्यंजकत्वांगीका
रात् न चैवं सर्वत्रैकैकगुणाभिव्यक्तिरेव स्यात् कार्यकारणगुणानुवृत्तिस्वीकारेण व्योमादिक्रमेण
कश्चिद्वित्वतः पंचगुणानां प्रागपि सत्त्वात् विद्वत्कारणस्य तु तेः पंचीकरणोपलक्षणत्वाच्चतस्य प्रामा
णिकत्वं तेभ्यस्थूलदेहादयो जायंते तेच नाहि त्रिश्रुतौ हि श्रुत इति कथ्यते इति न्यायेन पांचभौति
का उच्यते यत्तु रभागस्य भूतस्य प्राधान्यविवक्षायां देवदत्तापुत्रन्यायेन भौमादिव्यवहारभाजो भवे
ति यत्र वकाशादिरूपकार्योपलंभाच्च कार्यकारणसंप्रत्यय इति न्यायेनैकदेहकारणतया पंचभूत
सत्तावधार्या सा चैकानेकत्वानगोचरतया वनवत्समष्टिर्व्यस्तवद्व्यष्टिर्भवति यद्वा व्यक्तिषु जातिव

सौ
सा॰
५
5

स्तर्वेषां व्यष्टिष्वनुस्यूतमेकात्मकं समष्टिः प्रत्येकं व्यष्टिः एतदुपहितं चैतन्यं विश्वनराभिमानित्वाद्विविधे
राजमानत्वाच्च वैश्वानर इति विराडिति चोच्यते व्यष्ट्युपहितं विश्वशरीरप्रविष्टत्वाद्विश्वः तथा हि जीव
स्त्रय उपाधयः स्वभोक्तृत्वादिभेदैः कारणोपरंजितमज्ञानमात्रमुपाधिः स्वप्ने लिंगशरीरं तच्चाज्ञानोपरं
जितमहमज्ञ इति प्रतीतेः जाग्रदेतदुभयशरीरसंसृष्टं स्थूलशरीरम् पीनोऽहं निश्चिनोम्यज्ञोऽहमित्यनुभवा
त् एतदेवान्नविकारत्वादन्नमय इत्युच्यते न च पूर्वोत्तरविरोधः पंचीकृतानामेव भूतानां कारणपरि
णतत्वात्तद्धेतोरेव तदलर्किजैनेनिन्यायेन पांचभौतिकत्वानपायात् तमःप्रधानाज्ञानोपहितचैतन्या
द्व्योमादयो जायन्ते तेषु च कारणगुणप्रक्रमन्यायेन सत्वादयो जायन्ते तत्र तद्रजोंशेभ्यो मिलिते
भ्यः प्राणो जायते स चैकोऽपि स्थानभेदात्प्राणापानादिसंज्ञां लभते न च व्योमवद्देहे हृतिलाभमात्रेणा
वस्थितो बाह्यवायुरेवास्तु पंजरचालनन्यायेन वागादीनां सामान्यवृत्तिरूपा क्रिया वास्तु किं विशेषक
ल्पनागौरवेण धर्मिकल्पनातो धर्मकल्पना वरीयसीति न्यायादिति चेन्न एतस्माज्जायते प्राण इति
श्रुतेर्वायोरिन्द्रियाणां च प्राणात्पृथगुपदेशात् तथा च न्यायः न वायुक्रिये पृथगुपदेशादिति व्यस्तेभ्य
स्त्वक्रमेण वागादीनि जायन्ते तत्सहितः प्राणः प्राणमयकोशो भवति तत्सात्त्विकांशेभ्यो मिलितेभ्यो
न्तःकरणं जायते तच्च मनोबुद्ध्यात्मकवृत्तिभेदाद्द्विविधं व्यस्तेभ्यस्तेभ्यः क्रमेण श्रोत्रादीनि जायन्ते तैः
सहितं मनोबुद्धी मनोमयविज्ञानमयकोशावुच्येते एतत्कोशत्रयं मिलितं सप्तदशावयवं सूक्ष्मश

रीरमिति लिंगमिति चोच्यते अत्रापि समष्टिव्यष्टिव्यवहारः पूर्ववन्मतभेदेन ज्ञेयः तत्र समष्ट्युपहितं चैतन्यं
हिरण्यगर्भ इत्युच्यते व्यष्ट्युपहितं तु तैजस इति अनिर्वचनीयं ज्ञानबाध्यं भावरूपं त्रिगुणात्मकमज्ञा
नम् तदेव जीवे शावाभासेन करोति मायाविद्या च स्वयमेव भवतीति श्रुतौ मायादिशब्देनो
च्यते तत्र शुद्धसत्त्वप्रधानं सन्मायेत्युच्यते मलिनसत्त्वप्रधानं त्वविद्येति सा च प्रियमोदादिसहिता ते
दप्रचुरत्वादानन्दमयो वै थ देतत्वात्कोश इति स्थूलसूक्ष्मदेहकारणत्वात्कारणशरीरमिति चोच्यते
तदुपहिता चिदाप्त इत्युच्यते मायोपहितस्त्वीश इति पतयोरैक्यमग्रे वक्ष्यामः कोशानामनात्मत्वं त
पूर्वोक्ता युक्त्यर्थोऽनुसंधेयाः संघातानामात्मत्वमपीन्द्रियवृन्दानामात्मत्ववन्निरस्येयमिति दिक् इति श्र
स्थूलारुंधतीन्यायः १ अत्रादितयारभ्यैतावद्ग्रन्थसंदर्भप्रसंगादन्यत्रान्तरेष्वपि वेद्यमायायाः पठिता
नैपाठक्रमेणैव लिख्यन्ते संगतिस्तु न लेखितैव यथा सुभिक्षुपादप्रसारणन्यायेनातिदेशसंग
तिः प्रासंगिकेष्वपि न्यायस्थास्य संगतिर्भवितान्तस्याप्यर्थमात्रं वक्ष्यामः एवमग्रेऽपि बोध्यं यत्रायं
दर्शनसचोदनार्थ इति न्यायः शाबरस्वामिवचनमिदं अस्यार्थः श्रुतार्थेनान्तरीयकतयालभ्यते
नसवेदार्थ इत्यर्थः लोकसाधारणायनसशब्दार्थ इति पठ्यते २ अनन्यलभ्यः शब्दार्थ इत्यप्येता
दृशः २ यत्परः शब्दः इति योऽर्थः परः तात्पर्यविषयो यस्य सः यत्परः स्पष्टमन्यत् ३ कंठचामीकरन्या
यः यथा कंठगते हेमभूषणमज्ञानादप्राप्तमिव कंठे तं पश्यतोपदेशाज्ज्ञाते प्राप्तमित्युपचर्यते

लौ॰ न्या॰ ८

तथाप्रकृतेपीत्यर्थः ४ अर्केचेदितिन्यायः अर्केगृहकोणेस्थंमधुममत् ५ मज्जनोन्मज्जनन्यायः यथा
नद्यादौपतितस्तरणानभिज्ञः कदाचिन्मज्जति कदाचिदुन्मज्जति तथेत्यर्थः ६ यदानद्यांपातितः सोऽप्य
वलंबनमलभमानोव्याकुलचित्तः कुशकाशादीनालंबते तत्सकुशकाशालंबनन्यायः अनेनहि
हिदृष्टास्वयुक्तिषुनिरस्तासुनिर्वृत्तायुक्तीरवलंबमानोऽलमनेनकुशकाशावलंबनन्यायेनेतिनिरस्य
ते ७ यथापंकलिप्तालंबिकानदीमध्यदेशेमज्जतीपंकक्षये अवकाशमागम्यतिष्ठति तथाजीवादे
हृतये अलोकाकाशमागत्यातिष्ठति अयमेवतस्यमोक्षइतिदिगंबराः इतिजलतुंबिकान्यायः ८ तदेक
देशिनस्तपञ्जरस्थकपोतिचालनन्यायेनसदोर्ध्वगमनमेवतस्यमोक्षंमन्यन्ते ९ विवेपबह्वलंधाव
नमेवपुरुषार्थंमन्यमानाबालैरपिउपहसनीयाइत्यलमुन्मत्तवचसिकाबहुषाणाङ्गावनेनेतिन्याये
ननेहनिरस्यन्ते १० जीवःस्वाविद्यादिभिर्देहान्तरंनिष्पाद्यैवपूर्वंत्यजतीतिविवृतायांतृणजलौकान्या
यः सापिहितृणान्तरमाश्रित्यैवपूर्वंत्यजति ११ एकसंबंधिदर्शनमपरसंबंधिस्मारकमितिन्याये
नमज्जनोन्मज्जनन्यायादनन्तरान्यायाः स्मृतोदाहृताः हस्तिपकदर्शनस्यहस्तिस्मारकत्ववत्नद्या
दिज्ञानस्यतत्संबंधिकुशादिस्मारकत्वं इतरन्यायद्वयेपिपञ्जरस्थकेऽन्यस्यतथैवोदाहरणं द्विती
यस्यतालेपसंगमोदाहरणम् १२ स्थूणानिखननन्यायः स्थूणायथाऽसकृत्संचाल्यनिखननेक्रिय
माणेदृढाभवति तथोत्तरग्रंथेनप्रागुपपादितार्थदार्ढ्यंभवितेत्यर्थः १३ सिंहावलोकनन्यायः

न्योपि

सिंहो यथा कंचिन्मृगं हत्वाऽग्रे गच्छन्न सो विवेचयत्यन्यमपि हन्मीति धिया पश्चात् पश्यति तद्वदिति वट
स्थिपथमागतं तथा बुद्धिपथमागतं स्वपक्षपरिपन्थिपरपरिकल्पितं पुरुषाभासोऽनन्तरं निरामायापु
नरप्यन्यग्रहणमिति तात्पर्यार्थः १४ पारिषदन्यायः यथा पारिषदानामेकस्मिन्नृपे प्रविशिष्टे तत्कार्यं निर्वाह
स्तेष्वप्यर्थः १५ नान्यदृष्टमिति १६ बहुवृकाकृष्टेति च स्पष्टौ १७ बहुराजकपुरन्यायोऽप्येतादृशः १८
वरगोष्ठीन्यायः गोष्ठी रसालापवार्ता वरलाभाय गोष्ठी वरगोष्ठी तन्न्याय यथा वरवधूबन्धूनामेकमते
सति विवाहरूपमेकं कार्यं निष्पाद्यते तद्वदस्यार्थः १९ स्वामिभृत्यन्यायः २० मुञ्जादिन्यायः मुञ्जाख्यलक्षणा
दिषीकाख्यगर्भस्थं मण्डलणं यथा बहिरावरकं तथा स्थितानां मुञ्जाख्यलक्षणानां विभजनेन समुद्धियते
तद्वदस्यार्थः २१ गड्डलिकाप्रवाहन्यायः गड्डलिकामध्यमवीनां गणादेका चेत्कूपे पतिता तदा वार्यमा
णापि सर्वा तत्र पततीति प्रसिद्धम् २२ एतादृशप्रवाहपरम्परान्यायः सोऽप्यूर्ध्वमव्येऽनवस्थायां स्थलेप
वोदाह्रियते २३ वटेयक्षन्यायो यथा वटे यक्षः परंपरोपदेशमात्रमूलभूतो न त्वभावो नास्ति तदासोऽप्येतादृशः
सम्भेदविलक्षण इति बोध्यम् २४ मल्लग्रामन्यायः यथाऽन्येषु सत्स्वपि मल्लानां बहुत्वान्मल्लग्राम इत्यु
च्यते तद्वदस्यार्थः २५ एतेन ब्राह्मणग्रामाम्रवनादयोऽपि न्याया विहृताः २६ २७ नहि भिक्षुक इति स्पष्टा
र्थः २८ देवदत्तापुत्रन्यायः न हि देवदत्तायाः पुत्रो भवति किं तु देवदत्तस्यापि तथापि मातुः प्राधान्य
विवक्षया देवदत्तापुत्र इत्युच्यते २९ पितुः प्राधान्यविवक्षायां तु देवदत्तपुत्रन्यायेन व्यवह्रियते ३० प्र

लौ० न्या० १ नैवप्रासादवासिन्यायोप्यवगन्तव्यइति एकएवदेवदत्तः कालभेदेनप्रासादोपर्यधश्चवसन्नपिप्रासादवा०
सप्रासादोधोवासेनप्रासादवासीत्युच्यते ३१ कार्येणकारणसंप्रत्ययइतिन्या० ३२ नद्वेतोरेवतदस्तु किंतेनेतिन्या०
तस्यकपालादेर्हेतोर्मृदादेरेवतत्तद्घटादिकारणत्वमस्तु किंतेनांतर्गडुनाकपालादिरूपकार्येणेत्यर्थः ३३
कारणगुणप्रक्रमन्या० कारणगुणाःकार्येस्वसमानजातीयगुणानारभन्ते यथातन्तुरूपादयःपटरूपा
दीनीतिन्यायार्थः ३४ पंजरचालनन्या० यथास्वयत्नैर्दशभिःपक्षिभिःक्रियोत्पादनेनपंजरचालनंक्रि
यतेतथादशभिरिन्द्रियैःप्राणरूपैकक्रियोत्पादनेनदेहचालनंक्रियतइत्यर्थः नवाशुक्रियेइत्यधिक
रणपूर्वपक्षन्यायोयम् ३५ धर्मिकल्पनातइतिस्पष्टः धर्मकल्पनायाःश्रेष्ठत्वेवलीयस्त्वंवप्रयुक्तं ३६ संभ
वत्येकवाक्यत्वेवाक्यभेदोहिनेष्यतइतिन्यायोपितथाबोध्यम् ३७ प्रकृतमनुसरामः एतन्निमित्तपा
दप्रसारणन्यायोपिव्याख्यातप्रायः विषयोदाहरणसाम्यात् अर्थसंगतीनयथाकश्चिद्दरिद्रोयथेष्टान्न
च्छादनवासगृहादिलाभायधनाढ्यगृहेप्रविष्टोनुगामपत्तलाभंदुर्लभंमन्वानःपूर्वमिहपादप्रसारण
मेभवतुपश्चात्परिचयेसंपाद्यक्रमेणसर्वंसाधयिष्यामीतिधियाऽल्पाभिलाषोंगीकरोति तथामानेवा
तिहितैषिणोगुरुर्निर्दिष्टतत्वेमनस्तत्वमतिप्रवेशमिच्छन्तीमन्कानमशक्यंमत्वानापूर्वोक्तक्रमेणसंसा
रमुक्तयेतद्बोधयतीतिबोध्यम् २ ३८ सोपानारोहणन्यायोपीहबोध्यः यथाप्रासादमारुरुक्षुर्युगपदा
रोढुमशक्नुवन्नूर्ध्वोर्ध्वीकृतांपतिसोपानमनुक्रमेणारोहत्क्रमेणप्रासादमारोहतितथास्वात्मभूत

मत्वानात्मवहितमिवात्मत्वमात्मत्वेनज्ञातुकामः सहसाज्ञातुमशक्नुवन्नुत्तरोत्तरात्मत्वबुद्ध्यापूर्वपूर्वात्मब
धीबाधेनक्रमेणाद्वयेवोपशमे शिवमद्वैतंचतुर्थमात्मत्वेनजानातीति । ३९ तस्माद्वा एतस्मादात्मनः
आकाशइत्यादावध्यारोपे यस्माद्यस्मात्तत्कल्पितात्तदतिरेकेणतदभावोयत्रसंभाव्यते तस्मिंस्तस्मिंल्लयोबो
ध्यते तत्रसोपानावरोहणन्यायप्रवृत्तिः यथायेनक्रमेणसोपानमारोहति तद्विपरीतक्रमेणततोऽव
रोहतितथापूर्वोक्तेपंचकोशावतरणन्यायेनतत्वबुद्धिमारोहयितुमशक्तोभोग्यभोगायतनतदाश्रय
वत्वदेशभुवनतदाधारब्रह्माण्डानिपंचीकृतभूतेभ्योनातिरिच्यन्तेइतिसंभावयेत् तानिचसहसूक्ष्मशरी
रैरपंचीकृतभूतेभ्यःएवंगन्धतन्मात्रात्मिकांपृथ्वींरसतन्मात्रात्मकाप्मात्रतयाभावयेत् अपश्चरूप
तन्मात्रात्मकतेजोमात्रत्वेन तच्चस्पर्शतन्मात्रात्मकवायुमात्रत्वेनतंचशब्दतन्मात्रात्मकाकाशमात्र
त्वेनतंचमहेश्वरमात्रतयाभावयेदिति एवंचयथापूर्वोक्तक्रमेणावरोहणात्मत्वेनभूमेतितथाते
नक्रमेणभावनात्मत्वेनभूमानमद्वितीयंशिवमेति प्रलयोप्यनेनक्रमेणबोध्यः सातात्मप्रकृतौविका
रलयइतिन्यायात् जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सुप्रलीयते ज्योतिष्यापःप्रलीयन्तेज्योतिर्वायौप्रलीयते
वायुश्चलीयतेव्योम्नितच्चाव्यक्तेप्रलीयते अव्यक्तंपुरुषेब्रह्मन्निष्कलेसंप्रलीयतइतिस्मृतेश्च वार्त्तिक
कारैर्विश्वादीनामपिविलापनक्रमउक्तः अकारंपुरुषंविश्वमुकारेप्रविलापयेत् उकारंतैजसंसूक्ष्मं
मकारेप्रविलापयेत् मकारंकारणंप्राज्ञंचिदात्मनिविलापयेदिति अत्रापितदतिरेकेणतदभावभा

लो. सा. ८
8

वैनैवविलापनम् एषामनेनैवक्रमेणप्रलये उपाधिलयप्रयुक्तोलयोपिबोध्यः चिदात्मनोपिकुत्रवि
हिलापनेलेयस्मादितिशंकांवारयतिश्रुतिः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरिति ४ ४८ सा
तात्मकत्वाविति मायायोत्रयासेतिकः चदादेलेयोहिकपालादावेवभवतिनतुपरमाणुषुतत्थैवात्रभवा
दितितदर्थः १ ४९ केनाप्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतेइतिन्यायोपिव्याख्यातः आयन्यायत्रये
णाध्यारोपस्यचतत्थैनापवादस्यचप्रतिपादनात् ५ ४२ वेत्वागवयमायोप्येतादृशः कीदृशोगवयइ
तिग्रामीणेनपृष्टोवनेलिवित्वादर्शयामास सचवनेबुद्धित्वादेत्वागवयमेवगवयमेनेपश्चाद्दृष्टेनेगवय
दृष्ट्वारेत्वायांतद्बुद्धिंतस्माज्जेनितिलोकिकीगाथातथैवपुरुषइत्यादिश्रुतेः पूर्वोक्ततात्पर्येणभित्तोःनात्मा
नमेवात्मतयाजानीते गुरुशास्त्रोपदेशेनात्मनिस्तोतेतदात्मबुद्धिमपवदति ८ ४३ शाखांचंद्रन्यायो
पीदृशः यथाचंद्रंदिदृक्षोयिषुत्रामस्यादौदिगन्तरगतनक्षत्रादिभ्योदृष्टिंवारयितेशाखायांचेद्रइसपि
करणेनसंबंधविशेषणादौशाखायामुपलक्षणमुपादत्ते ततस्तदिगन्तरव्यावृत्तवतृष्णचंद्रसमी
पवर्तितारकादिषुचेद्रभ्रमोमाभूदिति तत्स्वरूपप्रकृष्टप्रकाशात्मकंबोधयति एवंहिबोध्यधीःस्वेवि
नचेदंःवतादिलाभवति तथापंचकोशावतरणवाक्येष्वपिबोध्यंएवंब्रह्मविदाप्नोतिपरमित्युपक्रम
ब्रह्मशब्दस्यानेकत्रप्रयोगदर्शनात्मकत्वभिर्नेयाब्रह्मशब्दार्थः कइति जिज्ञासोर्जगत्कारणत्वोपन्यासेन
येषुजीवादिषुजगत्कारणत्वनसंभवतितेषांकार्योपाधितयोपाधिदारास्त्यकोटौनिविष्टत्वेनलक्षुत्वा

संभवान्नेभ्यो व्यावृत्तबुद्धेरपि संभवज्जगत्कारणभावेषु प्रधानादिषु स्वस्त्वभ्रमसमपनेतुं स्वरूपलक्षण
मुपन्यस्यते नहि ज्ञातेनैतेषां ज्ञानादि स्वरूपतो पपद्यते ततश्चाद्यं लक्षणं केभ्यश्चिद्व्यावृत्तिनिश्चयपूर्वक
बुद्धिस्थिरीकरणार्थं द्वितीयं तु सर्वभ्रमनिवृत्तिपूर्वकवस्तुस्वरूपसमानिश्चयार्थं तेप्रसाथतटस्थस्व
रूपलक्षणयोरपीदमेव प्रयोजनं बोध्यम् १ ४४ एकैकस्य वस्तुनो मतभेदेन बहूनि रूपाणि तत्तच्छ
ास्त्रेषु प्रतिपाद्यमानान्युपलभ्यन्ते क्रिया हि विकल्प्यते न वस्तु किंतु मायाद्वस्तुनि विकल्पासंभवं च मता
विरुद्धानां समुच्चयस्याप्यसंभवेन नैष्ठिकमतप्रतिपादितं सर्वाविरुद्धं वस्तु स्वीक्रियते तत्र वृत्तप्रके
पनन्यायः प्रवर्तते यथा वृत्तमारूढः प्रमाणनयः स्थितैर्नरैः पूर्वं स्थिरं शाखाप्रकंपितं पूर्वं स्थिरं यामि
ति भिन्नभिन्नशाखाप्रचालनेन नियोजितः तदधःस्थैनैवचकेन वस्तुर्वृत्तप्रकंपने प्रेरितः सर्वैः पू
र्वं प्रचालनस्यात्मनयायोगवत्या संभवेन क्रमसविकल्पोपगमेऽपि सर्वविरोधासिद्धेस्तत्स्वीकारेण पा
वृत्ते प्रकंपयति तत्प्रकंपने च सर्वाः शाखाः प्रकंपिताः स्युरिति भवति सर्वैरविरोधः तथा योगादारभ्य
स्याद्वादान्तेषु वादिभिरविरोधायोपनिषदाभिमतो महेशाराको प्रायो वीतरागो मन्यते भिः ननु के
नमतेऽभिमता ईशः कश्चोपनिषदाभिमतः कथं च तदुपगमे सर्वैरविरोध इति चेच्छृणु तावद्यो
गाभिमतमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः सोऽपि जीववदसंगश्चिद्रूप
स्वपरस्य जीवस्य फलनियंतृत्वात् प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः नन्वनियंतृत्वेनामतत्वके

लो॰ सं॰ ५

मेकारयितृत्वेन तस्यासंगस्यानुपपत्तेः यः कारयति स करोत्येवेति न्यायेन कर्तृत्वस्य दुर्निवारत्वात् दृश्यते
हि योधयितृत्वं भृत्येषु दानादिकर्तृत्वं स्वयं योधयितृत्वं च न लोहचुंबकन्यायेनासंगस्यापि प्रेरकत्वोप
पत्तेः नच तन्निःप्रमाणकं भीषास्माद्वातः पवते इत्यादिश्रुतिसिद्धत्वात् बंधमोक्षादिव्यवस्थाप्येष्या
घवस्थितमनुपपत्तिसिद्धत्वाच्च जीवानामभिसृवतः क्लेशादिरहितत्वेपि बुद्ध्यासह विवेकाग्रहणक्लेशस
म्बंधांगीकारात् ईशस्तु सदा तैरसंस्पृष्ट इति विशेष इति एतेन सेश्वरसांख्यवादोपि व्याख्यातः एतत्त्वलयो
गतेमतत्वात् तार्किकास्त्वसंगस्य नियंतृत्वमसहमाना नित्यबुद्धीच्छाकृतिमान् विशेष ईश्वरः स विशेष
त्वमप्यस्य बुद्ध्यादिगुणकत्वाद्देवनामप्यानित्यज्ञानादिमत्वादनित्यज्ञानादिमज्जीवेभ्यस्तु हेत्वन्तरएवमपि सि
द्ध्यति क्षित्यादिसकर्तृकं कार्यत्वादित्यनुमानेन तत्रमानेन सबलाघवादेकः सर्वत्रकार्योपलब्धेर्विभुश्च ज्ञा
नादेरुत्कर्षवदुत्कर्षोण्यगोकार्यो बाधकाभावादिति न्यायेन स्वात्मोपादानसर्वत्रसूक्ष्मदर्शित्वात्सर्वज्ञश्च
सत्यसंकल्पः यः सर्वज्ञः सर्ववित् इत्यागमोपि तत्रमानमित्याहुः यद्यप्यविद्याकामकर्माद्यभावाज्जन्म
सत्वमीश्वरे न संभवति तथापि नित्यनित्यसत्वांगीकारे बाधकाभावात् आनन्दं ब्रह्मणो विद्वानित्या
दिश्रुतेस्तु नित्यसत्वाश्रयत्वमपीशस्याप्यस्तवे समानमिति तदेकदेशिनः नित्यज्ञानादिमत्वे
सदासर्गप्रसंगात् नित्यनिर्दोषत्वे सदाप्रलयापत्तेश्चैतन्मते साधु अतो लिंगशरीरसमष्ट्युपहि
तो हिरण्यगर्भ ईशः नच देहयोगे जीवत्वे शोकं तत्साभिताविद्याद्यभावेन तस्याभावात् कथं तर्हि शारी

रपरिरपरिग्रहः लीलयैवेति गृह्णाण न चेत्तदीश्वरत्वेमानाभावः सूक्ष्मीयब्रह्माभिमानस्वतन्त्रमानत्वादिति
हैरण्यगर्भः स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युपहितो विराड्वेशः सचसर्वतोमस्तकादि
मान् सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादिश्रुतेः सर्वतः पाणिपादं तदित्यादिस्मृतेश्च स
देहत्वेपि जीवत्वाभावादिकं पूर्ववदिति विराडुपासकाः विधिमुपासीनास्तु बहुपाणिपादत्वं न शव
प्रयोजनकं अन्यथा क्रमिविशेषस्य सहस्रपादेरपीश्वरत्वप्रसङ्गात् तस्मात्कृतिसृष्टमासर्वेषां स्व
यशरीरया भगवत्या सरस्वत्या सहोपासितः सत्यलोकाधिपतिर्ब्रह्मैवेशः यतो वेदादिसार्गमन्त्रवाक्या
न्यथापूर्वं स्पष्टीकरोतीति विशेषवाक्येन ब्रह्माशाचतुर्दशीकरणवाक्यं वेदप्रजापतिः प्रजाः सृजते
त्यादिविशेषवाक्यानि तन्मतेनैव नेयानि सचरुद्रस्य स्वललाटाद्विष्णोर्नाभेर्हरेः रक्षणार्थं मव
तारेषु नियोजकः कश्चित्तयोः स्वमाहेश्वरं त्रिलोकसंग्रहाय साचविधेः स्वीयैवतयोः स्वांशतादिमा
त्रः श्रीविष्णुनाभिपङ्कजपद्मोत्पन्नो हि विधिः स चैतत्क्व तिष्ठतीति विचारितवान् सोऽप्यपश्यत्कारणं इति
सूक्ष्मोऽसमस्तपुष्पलिङ्गेतस्मिन्निदमपि तिष्ठतीति श्रुतेः ततोयदस्याधिष्ठानं तत्तस्य मूलमिति तन्निश्चया
र्थं विरंचिः समन्तात्पिनाकपश्यत्पश्चात्समाधिना चित्त एव भातमपश्यत् चिरं तप्त्वा तस्य साक्षात्कृतो नारदसम
र्थो बभूव तत एव च वेदान्तस्य नामसंकेततामागतेति भागवतादौ प्रथितं ततो विष्णुरेवेशः सचस्वकृ
तधर्ममर्यादापालनाय स्वेच्छयावतरति न तत्कस्य विद्राजया यथाह यदायदाहि धर्मस्येत्यादिः किं

मो॰
मा॰
१०

व महोपनिषदि एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादिना ब्रह्मेशानादिसर्वव्यवच्छेदेनैकस्यैव रु
द्रेः सर्गादौ सद्भावे ततः पुनरेव पंचात्मनि वाभिधायाथ पुनरेव नारायणः सोऽन्यत्कामो मनसाध्यायत तस्य ध्या
नान्तःस्थस्य ललाटात्स्वेदोऽपतत्ता इमा आपः तासु तेजोमयमण्डमभवत्तत्र ब्रह्मा चतुर्मुखोऽजायत इत्यादि
नाथाथ पुनरेव नारायणः सोऽन्यत्कामो मनसाध्यायत तस्य ध्यानान्तःस्थस्य ललाटात्त्र्यक्षः शूलपाणिः पु
रुषोऽजायत इत्यादिना च ब्रह्मरुद्रयोस्तत्सृष्टत्वोपवर्णनेन दृश्यते दृश्यते चैतदुपबृंहणे भारतादिषु त
स्माद्धि ब्रह्मरुद्रेशा इति वैष्णवाः केचित्त्रिमूर्त्तित्रयातीतमायाशबलब्रह्मनारायण इति मन्यन्ते स एव वासुदेव
इति महाविष्णुरिति चोच्यते तेषां ब्रह्मादक्षादयः कालस्तथैवाखिलजन्तवः विभूतयो हरेरेता जगतः स
ष्टिहेतवः विष्णुर्मन्वादयः कालस्तथैवाखिलजन्तवः स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः रुद्रः का
लोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः चतुर्धा प्रलयायैता जनार्दनविभूतयः इत्यादिवचनान्यनुकूलानि शै
वास्तु ततोऽस्य बन्धविपर्ययौ फलमत उपपत्तेरित्यादिन्यायेन पशुस्थानीयानां जीवानां बन्धमोक्षसुखदुः
खादिलक्षणफलप्रदधीनमहेश्वरः तत्त्वशैवलैङ्गादिषु शिवाधीनं प्रतिपादितेन तस्येश्वरत्वं ज्ञापयति न
न्याहि ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः पशवः परिकीर्त्यन्ते संसारवशवर्त्तिनः तेषां पतित्वा
द्देवेशः शिवः पशुपतिः स्मृतः मलमायादिभिः पाशैः स बध्नाति पशून्पतिः स एव मोचकस्तेषां भक्त्या
सम्यगुपासितः ब्रह्मादिस्तम्बपर्यन्तान्पशून्बद्ध्वा महेश्वरः पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकमिति

किंच जगत्कारणतयोक्तयोर्ब्रह्मविष्ण्वोरपि यदीशानस्य कारणत्वे तदा जगत्कारणत्वे किं वक्तव्यं यथा महत्त्वो
त्कर्षो हरिविरिंच्योः अहं ब्रह्मा कपिलोऽप्यनन्तः पुत्राः सर्वे बलिनः श्रान्तिवर्याः ततः सर्वे देवदेवप्रसूता एवं
सर्वेशः कारणात्मा नमोऽस्त्वित्यादिमन्त्रवर्णेषु भारते पुराणेषु च शिवहर्योरुपास्योपासकभावप्रतिपाद
कानि बहूनि वचनान्युपलभ्यन्ते तत्र कानिचिद्दृष्टान्तीकारे दर्शितानि विस्तरभयान्नेह लिख्यन्ते कौर्मे च मा
र्कंडेयादीन्प्रत्यृषीन्प्रति श्रीकृष्णः सर्गादौ महार्णवे काकतालीयन्यायेन स्वेन विधेः समागमे विवादे चोक्त्वा
मामात्मेन प्रागुक्तस्य शिवमाहात्म्यस्य व्यापनायोक्तवान् एवं विवादे वितते मायया परिमोहितः प्रबो
धार्थं परं लिंगं प्रादुर्भूतं शिवात्मकं कालानलसमप्रख्यं ज्वालामालासमाकुलं तयोर्हृदि विनिर्मुक्तमा
दिमध्यान्तवर्जितं ततो मामाह भगवान्योगात्मा त्वमाशु वै अन्तमस्य विजानीयामूर्ध्वं गच्छेयमित्यजः तदा
श्वसमयेक्त्वा गत्वा तूर्ध्वमधश्चैनो पितामहोऽप्यहं नान्तं ज्ञातवन्तौ समस्तवै ततोञ्जलिपुटो भूत्वा शंभुं तुष्ट
वतः पुनरिति शिवस्ताभ्यां तुष्टः स्वस्मात्तयोरुत्पत्तिमुक्त्वा वाच प्रीतोऽहं युवयोः सम्यग्वरं दद्मि यथेप्सि
तं ततः प्रहृष्टमनसौ प्रणिपत्य महेश्वरं ऊचतुः प्रसन्नवदनौ नारायणपितामहौ भक्तिर्भवतु नौ नित्यं त्व
यि देव महेश्वरः उवाच मां महादेवः प्रीतः प्रीतेन चेतसा प्रलयस्थितिसर्गाणां कर्ता त्वं धरणीपते इत्या
दि अत्रायमाशयः ब्रह्मविष्ण्वोरीशानाभिमानाद्विवादे प्रवृत्ते तन्निवारणाय लिंगाविर्भावः तच्चिह्नः पारमैश्व
र्यशक्त्याभिमानेन निवृत्ते शिवाविर्भावस्तस्मादास्तां तयोः सर्वसामर्थ्यमत एव योरैश्वर्यं शिवाधीने

स्तो० मा० ११ शिवस्यस्वाधीनेप्रसादेनैवतत्तन्माहात्म्यख्यापनायकेचित् कल्पेतत्तस्तत्तोंशेनाविर्भावइत्याद्युपपादितं एवं
शैवत्वेब्रह्मादिष्वपिदृष्टेएतत्तत्स्वस्वतंत्रैश्वर्यः शिवएवाराध्योमोक्षकामैः नहिभिक्षुकोभिक्षुकंयाचितुमर्ह
तिसत्यन्यस्मिन्नपिभिक्षुकेइतिन्यायात् देवोविश्वाधिकोरुद्रः शिवएकोध्येयःशिवंकरः अन्यत्सर्वंपरित्य
ज्येतिश्रुतेः सर्वैरेवस्वस्वाराध्यत्वेचतस्यमंत्रोदर्शयति अंतरिक्षेतितंननेकइंद्रवरेमनीषयागद्गुहाणिनिजिह्व
यामससमितिजनेष्वन्तर्यामिन्याविष्टन्तेपरःपरेश्रेष्ठेयेमनीषयासादरेध्यायेतितेसमंसस्यविकारमन्त्रेनि
ह्वयागद्गुहाणीतिशाङ्गार्थः येतत्कुतर्केव्यसतिनस्तमेतनेंकृतितेप्रीषमेवनिजिह्वयागद्गुहाणीतिधर्माः
त्वेत्वेवनेवाताइत्यादेरिवाश्रुत्ततश्रेशेसागमेयणेकरातः तथाशुपहृदितेपराशरेण अंतरिक्षेतियोरुद्रस्त
दावेयंमनीषयागद्गुहाणातिनिह्वयासोयंरसपूर्णोमस्ततोदकं अंतर्नैक्षेतियेकइंद्रभवानीसहितंभवंप्रीषमे
वगद्गुहाणीतिनिह्वयातेनसंशायइति अत्रायेनमन्त्रवाक्योर्थोदर्शितःद्वितीयेनगम्यः सचेहस्त्वयेवाधितत्त्वा
नेषांगर्हितत्वात्तिवेपर्यवस्यति प्रथमश्लोकोदर्शितोऽत्राधिकतेषाधिक्येषाधिक्येषांजन्माधिक्येषां येषान्
वसतिहृदयेकुमतिपथ्यविमोचकोरुद्रइतितस्मात्सर्वेवशित्वात्सर्वाराध्यत्वात्सर्वफलप्रदातृत्वाच्चसर्वे
शःशिवइत्याद्यः सचनिमित्तंजगतामुपादानंतत्तस्मात्मायेतिकेचित् परमाणवउपादानंमहेशोनिमि
त्तमित्यपरे अन्येत्वीशस्यैवद्रष्टाविदात्मिकाश्चानन्दात्मिकाचततआयामोरीतद्धिशिष्टस्यशिवस्यनिमित
त्वंद्वितीयाविशिष्टत्वंद्विशिष्टस्योपादानत्वंतयोश्चशिवस्वरूपत्वे तच्छक्तित्वेचमायाविद्यादिशब्दवाच्यत्व

शक्तिरेमेव साचोमयविधेपिकारणत्वेसहकारिण्णीस्माद्भ्रः एतन्मतमूलवचनानितत्रत्नाकरेद्रष्टव्यानि ए
देवाथर्वशिरसिपूर्वखण्डे देवाहवैस्वर्गंलोकमगमंस्तेदेवारुद्रमपृच्छन् कोभवानितिएष्टवतोदेवान्प्रतिसोऽब्र
वीदहमेकः प्रथममासंवर्तामिचभविष्यामिचनान्यःकश्चिन्मत्तोव्यतिरिक्तइत्यादिना एवंमायोवेदससर्वा
न्देवान्वेदयंतेनवचनेनशिवस्यसर्वात्मत्वंप्रतिपादितं अनेनरंततोदेवारुद्रेनापश्यन् तेदेवारुद्रंध्यायंति
ऊर्ध्वबाहवःस्तुवंतीतिदैवकृपास्यत्वंदर्शितं ततश्चद्वितीयखण्डेयोवैरुद्रः सभगवान्भूर्भुवःस्वर्यश्चब्र
ह्मातस्मैवैनमस्कारस्यश्चविश्वरूपश्चमहेश्वरइत्यादिप्रकारेणब्रह्मविष्णुरुद्रेशेमेन्द्रादीनांमहाभूतादीनां
चतद्विभूतित्वंपूर्वखण्डोक्तसर्वात्मवचनेनसिद्धमवयुत्यानुवादस्थानविशेषादर्शितं तृतीयखण्डेतथै
स्तन्नामनिर्वचनमुखेनतत्वस्यपरभावः स्पष्टीकृतः पंचमेतदुपासनादेवमोक्षइत्युक्त्वापाशुपतेयोगाख्य
कतदुपास्तिप्रकारोदर्शितः तदेवमादितआरभ्यान्तेविमृश्यमानमथर्वशिरोन्तोक्तंमूर्तित्रयादतिरिक्तः
परमशिवः सर्वतोऽप्यायत्वात्परेशइतिस्पष्टीकरोति कैवल्योपनिषदिचउमासहायंपरमेश्वरंविभुंत्रि
लोचनंनीलकण्ठंप्रशान्तंध्यात्वामुनिर्गच्छतिभूतयोनिंसहायंपरमेश्वरंविभुंत्रिलोचनंनीलकण्ठंप्र
शान्तंध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिंतमसःपरस्तादित्यादिनामस्योपास्यत्वमुक्त्वासब्रह्मा
सशिवःसेन्द्रःसोऽक्षरःपरमःस्वराट् सएवविष्णुःसप्राणःसकालोऽग्निःसचन्द्रमाः सएवसर्वंयद्भूतंयच्च
भव्यंसनातनं ज्ञात्वातंमृत्युमत्येतिनान्यःपंथाविमुक्तयेइतिब्रह्मादेस्तद्विभूतित्वंदर्शितं नचसब्रह्मे

लो॰ मा॰ १२ 12

स्यादीनामपरानां सन्निहितत्वे प्राप्यत्वेनोक्तेर्भूतयोनौ ब्रह्मण्येकविज्ञानाद् ब्रह्मादीनां तद्विभूतित्वमेव सिध्यति ननूपा
स्यविभूतित्वमिति शंक्यं भूतयोनिशब्दस्यापि यौगिकस्य सन्निहिते शिव एव वृत्तेः तत्क्रतुन्यायात्तदुपासना
परमेश्वरस्य मुक्तत्वेन तस्य शिवात्मत्वानिमकल्पनायोगाच्च नच कथं ज्ञातत्वमिति तस्य ज्ञानात्मोक्तप्रतिपादने
सगुणब्रह्मवादे तद्ध्यानादेव मोक्तस्योपपन्नत्वात् निर्विशेषब्रह्मवादे सगुणज्ञानान्मोक्तो नोपपद्यते इति ज्ञा
त्वान्निमित्तं च तमस्य निर्विशेषपरत्वावश्यकत्वात् पूर्वेषामपि तत्परत्वं सिध्यतीति चेन्न तत्सेजोऽस्तु न ते स्यादे
तत्परानां सविशेषत्वात्रावपि तत्त्वमसिवाक्यस्थतत्पदमात्रस्यैवात्तपपदस्य निर्विशेषलक्षणावद्याते
पपत्तिस्तस्यैव ज्ञातत्वातमिति तत्पदलक्षणाया माप्यत्वेन योजनप्राप्त्या योकावेयोमलबंधनस्यामुक्ते
त्वात् तस्मादुपास्यपरमशिवविभूतित्वमेव ब्रह्मादेरित्याहुः उभयोरुपनिषदोरुपबृंहणभूतानि भारतस्था
मकोर्मादित्यपाराशरशैवमानवादिपुराणवायुसूतसंहितावचनानि परमशिवसंहारकरुद्रयोर्नामरूप
साम्यस्य किंचिद्विशेषस्य च प्रतिपादकानि वचनानि रत्नाकरे द्रष्टव्यानि गाणपतास्तु तुरीयः परमशिवः
श्रीगणेश एव स एव वेदेषु सर्ववेदान्तेषु देवशब्दाभिधेयो महाविष्णुरित्युच्यते न तु शिवहृदये विष्णुहृदये वास्ति ये
नैकः शिवो विष्णुर्वा मूर्तित्रयमध्यगो द्वितीयस्तदतिरिक्तरसम्यगम्येन एवं च मम एव ब्रह्मात्मा परं ब्रह्म ब्रह्मा
दीनां तदंशत्वेन ब्रह्मत्वं व्यपदिश्यते विष्णुशानामिव विष्णुत्वं तथा च श्रुतिः नमस्ते गणपते त्वमेव प्रत्य
क्षं तत्त्वमसीत्यादि अत्र विशेष्यसंबद्धत्वादन्ययोगव्यवच्छेदिनैवकारेण पार्थ्य एव धन्वङ्गेरं ममत्वेवकारेण

पार्थादन्यत्रधनुर्द्धरत्वस्येव गणपतेरन्यत्रमातृद्रुहत्वस्यायोगोव्यवच्छिद्यते अतः श्रेयः कामैः सर्वैरपिसप
र्याराध्यः न च मूर्खा वि नाम्ना पूजावैयर्थ्यं स्मरणेन फलजनकत्वायोगात् अवश्यापेक्षितानपेक्षितयोरपेक्षिते
स्मरणीयनित्यन्यायेन कृताकृतप्रसंगीयो विधिः स नित्य इति न्यायेन च तदाराधनस्यावश्यकत्वात् कृतेव
तस्मिन् विद्यार्थी लभते विद्यां धनार्थी विपुलं धनं पुत्रार्थी लभते पुत्रान्मोक्षार्थी परमं पदमित्यादिवचनेभ्यः
सर्वेष्टलाभसंभवेनानर्थान्ते महाभाष्ये व्याख्यास्या पदमंजरी अधीतेऽपि महाभाष्ये व्याख्या सा पदमंजरीति
मदाराधने प्रयोजनाभावात् सूर्याद्याराधनफलारोग्यादिमोक्षान्तकथनानन्तरे सर्वमिच्छेज्जनार्दना
दिति स्मरणमप्यत्र मानं तस्मादेव ब्रह्माच्युतत्रिलोचनप्रवृत्तेषामिष्टादिसामर्थ्यलाभश्रेयस्याद्भुः पर
मशिवविभूतिरूपस्यापि श्रीगणपतेस्तत्त्वेन वर्णनमुपासनार्थं वा तत्त्वतदभेदाभिप्रायेण च सर्वत्र नमू
ननु विधानमपि तन्मूलं न स्यात् तस्य कर्मोपासनांगत्वात् न चैतावता तेषामननुष्ठानापत्तिः प्रयाजादिषु
कृतेषु ज्योतिष्टोमादीनामप्यननुष्ठानापत्तेः इतरोपासनादिविधायकशास्त्राप्रामाण्यापत्तेश्च सर्व
मिच्छेदित्यादि तत्त्वविनायकाराधनस्यापरेषु रयासर्वत्रोपयोगवर्णनपरे न त्वितरनिषेधपरं तद्विधिवि
रोधात् किं च हेरंबोपपादकवाक्येषु परमशिवनामानि रूपाणि च न दृश्यन्ते अतो न स परमशिवः किं
तु शंभुशिववृषांकादिनामा त्रिनेत्रेन्दुशेखरादिलिंगो विधेरपि शास्त्राहरेरपि वरप्रदस्तेन तत्पुत्री का
लभैरवपदवेदान्तप्रतिपाद्यो मन्मतस्तदिराराध्यो मूर्तित्रयपरः परमशिव इति भैरवमुपासीनाः श्री

लौ
म्या
१२
13

महोर्मिभक्तानां कौमैव बलविष्णोः स्वस्वसर्वेश्वरत्वाभिमानेन विवादे शब्दैर्वेदैः प्रणवेन च स्थ
कस्य बोधितौ विधिनो वक्त्रद्वेषेण महानीललोहितो रुद्रः प्रादुर्बभूव स च तद्वचनं क्रोधाभैर
वं प्रेरयामास तेन च तच्छिरसि छिन्ने सति सोमः परमशिवः प्रादुर्बभूव स च ब्रह्मा बहुयानतः स्व
पादयोः पतितं नमस्त्याग्य वरं शुद्धदत्ता ब्रह्मवाक्येऽस्थिते नीललोहितमीश्वरं प्रथमब्रह्मणस्य जग
त्स्वामस्य प्रथमः स्मृतः आत्मनो रक्तणीयत्वे गुरुत्वैः पितामह अथ च भगवान् स्वज्ञो सर्गाभव
तानन्त यातिनत्यो विविश्वस्य यात्रार्थशिरस्त्वया ब्रह्महत्यापनोदार्थं व्रतं लोकस्य दर्शयन्तः । वरा
स्वभिक्षा भिक्षादिना नीललोहिते व्रतमाचारयच । स्थाने स्वाभाविके दिव्ये यथोक्तपरमेऽपदे ततः स भगवानी
शः कपर्दी नीललोहितः आह्वयामास वदनं ब्रह्मणः कालभैरवमित्युक्तं अत्र सदाशिवांशनीललोहिता
ख्यो भैरव इति भाति काश्यां त्वत्रैषि कौमौक्तरी सैव प्राकृत सर्वं ब्रह्मानन्तरूपपाय अघेश्वरः पञ्चभैरव का
लवद्राजसे सात्त्विकालराजस्तां भवान् विश्वं मंत्रे समर्थो सि भरणाद्भैरवः स्मृतः ततो भेष्यति कालोपित
तस्त्वं कालभैरवः यतः पापानि भक्तानां भक्तविघ्नान् शिक्षितान्तरणात् पापभक्षणाद्रेषेव नवनामा भविष्यती
त्यादिना नीललोहितात्कालभैरवोदयस्य विविधवरलाभस्य चाभिधानात्तस्य तदंशत्वमवगम्यते । म
हादेवांशसंभूते भैरवे भैरवाकृतिमित्यपि तत्रैवोक्तं इह महादेवः परमशिवस्तदंशो नीललोहितस्ततः सं
भूतस्य भैरवस्य परमशिवांशांशत्वं स्पष्टं प्रतीयते एवं पाद्मादिष्वपि द्रष्टव्यं तथा चाशोभितेनारमेदोपगामास

१२

रमशिवांशानीललोहितेशानेन्द्रैरवस्यसदाशिवाङ्गे दोभावान्नत्वेन मूर्त्तिर्न विकल्प्यते साक्षात्परमशिवस्य श्री
महाभैरवस्य हि सदाध्येयः तदुक्तं ध्यायेन्महाविदेवं कनककान्तिविनिर्मलं मौलिसमाभूषितमंगे सेतां संधेन्दुकलावि-
विधभूषणैः सेव्यमानं कृतार्थैः शुक्लांघ्रिदिव्यमूर्धां चमत्कविलसितं नेत्राच्छूर्णोभिरामं नित्यं भक्तेष्टदं सत्याग
पतिहृतं नित्यमोंकारगम्यमिति अयं त्वेन नित्यपदेन आगमाभावाश्रुतियोगित्वविशिष्टधर्मास्रुतियोगिताधिके-
ननकृतस्थितिरुत्पत्तिः नवाकृष्य विलयश्च निश्रुतिपादनात्सर्वकारणत्वमूचितं पूर्वतत्ध्यायेदित्यनेन योजनीय
तथा चोंकारगम्यो ब्रह्मविष्णुशिवात्मकः स च परमशिवोऽन्यत्सर्वं परित्यज्य सदाध्येयः शिव एको ध्येयः
शिवंकरः अन्यत्सर्वं परित्यज्येति श्रुतेः अयमेव हरिहरयोः स्वविभूतित्वेन ग्रहणान्मेलापरूपत्वमुच्यते मःशंभु
रस्य विष्णुस्तावित्याधायदृष्टान्तौ तदा मेलापदृष्टान्ततावाचानीति विग्रहात् मेलापरूपत्वमत्राह रेन मत्स्यपम्मूर्ति
लेतिनिरुक्तेः एतयोर्व्योर्मेयेनोच्चारणेन मेयालङ्कारापि व्याप्तेत्युच्यते हरिहरयोः सविभूतित्वेन विपेस्यत्वन्तरो
सिद्धं विष्णुत्वेनैव तन्माहात्म्यं ब्रह्माण्डादिपुराणेषु तस्मादयमेव विशेषश्रुत्याह श्रीस्वामिकार्तिकेयोपास्यका
लस्य सर्वगतत्वाङ्गत्वानुसन्धानविलासात् ज्ञानशोभणात्केदपदाभिधयः सर्वबुद्धिरूपात् शास्त्रियत्ने आधारत्वेना
स्येति श्रुत्यमभ्यार्श आद्यं जनेतरहृपदाभिधयश्च सर्वान्तरात्मा सन्नजनीयानन्तकल्याणगुणो ब्रह्मादिविभूतिमा
न तेषां कर्त्तानेता च परमशिवः श्रीमद्ब्रह्माण्ड एवेत्याह पतेषु गणानामादिमतेषु श्रवणाद्विवचनितु लौकिक
न्यापरलोके दर्शितानि । एवं ह्येकस्यैव सदाशिवस्य लीलाविग्रहे सेकार्थे ज्ञानं दत्तानानंदयन स्वरूपमेष्यप्यव

लौ॰
न्या॰
५
15

नचघटनापटीयस्यान्मायया: स्वदेहेवह्निमपरिहृत्य इत्यादिना आनीयमाणे पुकर्षविट्रुत्कर्षोपकर्षकल्पकानां
वैषम्यमन्यानां कोलाहलोदर्शितः तादृशेषु च वैषम्यवावतारेषु पृथक्षविट्रुत्कर्षोपकर्षकल्पकानां वैषम्यमन्यानामा
पि कलहलस्यैव दर्शयति केचिन्नृसिंहतापनीयानुसारेण श्रीनृसिंह एव मूर्तित्रयपरो वासुदेवाभिधो महाविष्णुः
अन्ये मूर्तित्रयं तारतम्येन विष्णोरंशावतारा इति मन्यन्ते । अन्ये तु ब्रह्माविष्णुरुद्रेभ्य आदि श्रीराममूर्तिमात्रिस्य
एव तस्याविधः अन्ये तदंशांशा इत्याहुः श्रीकृष्णोपासकास्तु एकैव स्वयं तात्मानात्मा वासुदेवादिशब्दाभिधेय
तावत्स्वादिमहदादिमेव च शाकलांशः श्रीकृष्णस्तु भगवान्स्वयं मत्तः परतरं नान्यदित्यादि वचनैः कोटिशो ब्रह्म
एव तस्यो विष्णोरंशांशा इत्याहुः एवं वामनादिषु पितो च्यं किं बहुना एकस्मिन्नपि कृष्णे गोकुलस्थो न्यो हा
रकास्थो न्य इति भेदमारोप्य पूर्वः पूर्णो न्योंशा इत्येके हरिवंशे जरासंधभयाद्विपलायितः कृष्णः परशुरा
मेण संगतस्तेनो मंत्रं प्रदत्तवान् स च तस्मै मंत्रमुपदिश्योवाच न चैते कृष्णसंग्रामे सव्यं प्रवैष्णवं वपुः इस्य
तिरिपवः सर्वे सत्तास्वस्वभावेन । मांभजस्व गदां कृष्ण चक्रं च विधि विस्मृतमिति अनेनैतः पूर्वो विष्णोरंशः पयवासी
त अनन्तरं स्वयमागात इति गम्यते अयमर्थो नैव शुक्रशाल्वेन स्पष्टीकृतः तथा च पूर्वोंशो न्यः पूर्णो इत्यप्यादि
त्यमित्यन्ये एवमेतादृशेषु देवीविग्रहेष्वपि तन्माहात्म्यवचनान्याश्रित्य केचित्स्वरस्वती अन्ये रमामन्ये उमां
सर्वोत्तमामाहुः । केचित्तमांकेट्यां तारयंति समस्त निकायशनिपायामहालक्ष्मी सर्वोत्तमा ब्रह्मादयः भारमादि
यश्च सर्वेतत्त्विभृतयः सैव सर्गादिहेतवे पमोसादि हेतश्च तयाविसृज्यते विश्वं जगदेतच्चराचरं सैषा प्रसमा

१५

मोवदानत्वेनांभवतिमुक्तये संसारबंधहेतुश्चैव सर्वेश्वरेश्वरी सृष्टिस्थितिविनाशानां शक्तिभूते सनात
नि विष्णुः शरीरग्रहणमहमीशान एव च कारितास्ते इत्यादिवचनात् तथैव हि सप्तशक्तिविमानस्थब्रह्माणी
रूपधारिणीत्यादिना हंसप्रमाणहरैर्वैष्णवीमनेन समस्तमातृणां तद्विभूतित्वं दर्शितं । एतेषां ब्रह्मादीनां सर्वेषां तद
शक्तानां तदभिमतत्वेऽन्योन्यमस्यभेदः तदभिमानाभिमतस्य तदभिमतत्वमिति न्यायाच्छक्तिवंदेति ध्यानिकरहस्या
दिवचनावलेख्यतन्मतप्रपंचोपि रत्नाकरे द्रष्टव्यः एवमग्नीशादित्येश्वरवादोपि तन्माहात्म्योपपादकत्व
तिस्सतीतिह्यामवचनान्याश्रितत्वे च तद्रूपे विनाशेयाः । तत इन्द्राद्यपि सर्गादिहेतुत्वरूपेश्वरलक्षणाक्रान्ता
दिप्रमाणं च तत्र तत्र दर्शयंतो लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेनेश्वरत्वं साधयन्ति एवं हि वादिनोऽय
हि वाहस्तत्त्वज्ञानगामभिति न्यायानुसारिणि स्वस्वेष्टदेवतामाहात्म्यवाक्यानि पश्यंतोऽन्यानि तत्पश्यन्तोपि कुत्रा
ग्रहपितृद्वेष्टत्वादपश्यंत इव तदेकवाक्यतादिकं च जानंतोऽन्यागमन्यायेनान्योन्यं विवदन्तोऽद्यापि च
मतान्तरे ह्रूपमाणकन्यायामिनाश्रुवन्तो बुद्धेः परमनीयतां यान्ति केचित्स्वस्वरूपशीतिमान्यत्वादालमभूत
त्वेनपि शास्त्रादीन्स्थापनापितत्त्वत्रन्यायेनायमेव सर्वोत्कृष्टोऽयमेव सर्वो नमस्य इति मन्यन्ते तेभ्यस्तु स्वयं तस्मत्त्वा
भिलषितार्थलस्माच्छ्रेष्ठेभ्योपि स्वशिष्यमपि पुत्रं वेति न्मित्वदाद्यमयाचतेति न्यायेन स्वाभिलषितार्थान्याचं
ते अन्ये च दास्यायैव स्वयं नाकें च शादीनि स्वस्वकुलदेवानि मत्वा स्थावरयोनि शाश्यानि दुःखितेभ्योपि तेभ्यो
महिषीयमवोनग्नशीर्महिषो मदनातुर इति न्यायेनेष्टयाचते अंधयद्यटन्यायेनाकस्मालब्धवार्थेनरूढतेमन्य

लौ
गा
१५
15

ते अघटनघटनापटीयस्या मायया परिणतेन जगदाकारमभिन्ननिमित्तोपादानेन परब्रह्मणा परमेश्वरः तस्यांशश्चांशो जीवेश्व
रकोटिभिर्ब्रह्मादिभिर्जीवकोटिभिश्च मनुष्यविराड्भ्यादिभिर्जगद्व्याप्तमित्यौपनिषदः तथा च श्रुतिः मायां तु
प्रकृतिं विद्यान्मायिनं तु महेश्वरं तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति एवं च जडानामप्यधिष्ठातानन्ति
रेकादशीव्रतवादिभिरपि न विरोधः सर्वैश्चैतैस्सेवित ईश्वरस्तेभ्यः फलदो भवतीति फलवैषम्यं तु धर्माधर्मादेः सा
त्त्विकादिवैषम्यात् सोऽपि तु परब्रह्माभिन्नबलसत्त्वात्कारादेव तदुक्तं हरेः ईशावास्यविराड्धेयाविश्वसृष्टेः प्रभु
ग्रहः विष्णुभैरवभैरवमातृकाप्रत्यासत्ताः विश्वतन्त्रियविदग्ध्वागवाश्वमन्दापालिएः अश्वत्थवटचूतना
यवव्रीहितृणादयः जलपाषाणास्तम्भकाष्ठवाल्मीकदालकादयः ईश्वराः सर्व एवैते मूर्तिमन्तः फलदायिन
यथा यथोपासते ते फलमीप्सन्तथा तथा फलोत्कर्षापकर्षौ तु धर्माधर्मावस्थास्तु तत्त्वतः सत्कीर्तितब्रह्मतत्त्वस्य
ज्ञानादेव नचान्यथा स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत्
ईशजीवादिरूपेण चेतनाचेतनात्मकमिति तत्र ब्रह्माभिन्नमेकमेवाद्वितीयं ब्रह्मेति भगवतो सिद्धान्तः । ई
श्वराः सर्व एवैते इत्यस्मात् प्रत्यलिङ्गयादेवं भजेत्याभक्तोऽपि न हरति न्यायेन जीवेशाभेदसाधयितृप्रहेतोर्भव
न्ति सर्ववादिसंमतेशाभेदोऽपि नाशितः स्यात् नैवैषां विकल्पेनेशाभेदसंभवः वस्तुनि तदयोगात् नापि स
मुच्चयेन परस्परैषिल्लत्वापत्तेः नापि कल्पभेदेन व्यवस्था सर्वेषामप्येकस्यैककालतः परिच्छिन्नतयान
कस्यापि सर्वेशत्वमिति दोषापातात् तथा च बहुभिः सर्वतोमुखे विनष्टमिति न्यायापातः अश्वत्थादीनाम्

१५

तत्कथमपि संभवति प्रमत्वादिविरोधात् सर्वेषामीशत्वांगीकारेपि तस्मात्संगत्वेन घटादिवद्विनाशोप
त्तिः ब्रह्मादीशत्वबोधकानामुत्कर्षापकर्षबोधकानां च वाचां व्यवस्थाभावादप्रामाण्यापत्तिः गतं च जीवे
शकोटित्वव्यवस्थानमप्युत्कर्षेधर्मोत्तादिव्यवस्था च तत्प्युत्कर्षश्रुत्यादिप्रामाण्यं च तथा च वर्मतन्त्रो महर्षीदे
तीतिन्यायापातः तस्मात्कथं ब्रह्मादेरीशकोटित्वे कथं वा तेषामत्यन्ताभेदः को वा नन्तदुत्कर्षापकर्षबोधव
सां व्यवस्था कथं च तन्माहात्म्यं वचसामेकवाक्यता ब्रह्मादेर्जीवकोटित्वे च कात्तदीशत्वबोधकवाचां ग
तिः कथं वा जीवेशाभेदः कथं वान्योन्यं जीवैक्यं कथं वा ब्रह्मणोः आत्मनोभेदाभावः कथं वा तेषामन्योन्यम
पि भेदाभाव इति सर्वं सम्यगुपपादनीयं येन स्वसिद्धान्तः प्रकृतन्यायसंगतिश्च सिद्ध्येत् अन्यथा ईश्वराः स
र्वे एवैते इति यथाश्रुतोपपादने प्रकृतन्यायसंगतिसिद्धावपि माङ्कतोलनन्यायेन स्वसिद्धान्तप्रच्यवनादिव
ज्रलेपायते अस्माकं पुनरेवं तावदिति श्रुतेः सावयवतोप गमे वा घटादीनां जन्मनाशादिमत्त्वेनोपपन्नमपि यत्र
मौ विकारोऽतिहि यत्किंचिन्मिति न्यायाद्ब्रह्मणः कूटस्थत्वहानिरिति चेदुच्यते एक एवाद्वितीय इति श्रुतेस्तु
बुद्धस्वभावः कूटस्थः परमात्मा कार्यमात्रप्रकृतिस्त्रिगुणमायोपहितः सर्वनियन्तृत्वाद्धेतयोमी
कर्तेमकर्तेमन्यथाकर्तेश्वरत्वादीश्वर इत्युच्यते यथा चैक एव देवो नीलो नीलेति बीजवापं ऊर्ध्वं व्यापकः स एष
पेतेन मेवत्वेन न लमेकादिना पालयन्वालकः अनेनैवचादिना तमप्युपसेहन्लावकारिन्युच्यते तथैक एवे
शः स्वमायामायागुणत्रयप्रयुक्तसर्गादिकर्मभेदेन ब्रह्मविष्णुरुद्र इति शैवैरुच्यते तत्र कारणीभूतरजोगुण

शै
सा
१९
16

ग्रहणेन सर्वेशं पंचस्वरूपमन्त्वेनिरूप्यते हिरण्यगर्भस्वरूपं पंचीकृतपंचभूतसमष्टि नामावान्नब्रह्माण्डस्थापि पंची
कृतभूतभौतिकसमष्ट्यात्मकविराट्स्वरूपपर्यन्ते सर्वजीवप्रवर्तकत्वान्तर्यामिस्वरूपात्माहंग्रहोपासनया तद्भावे प्राप्नः इति
श्रमितुमिति हासादिषु अतस्तदीशत्वबोधकावाचस्तदन्तर्यामिपराः एवं विराड्रूपीश्वरसूर्यादीशत्वबोधकाश्च
पीतिबोध्यं तदन्तर्यामिनस्स्वब्रह्मतत्त्वदभेदेऽपि भेदव्यवहारोपदेशाच्चान्यः इत्यादिसूत्रेभ्यः यश्चादित्ये तिष्ठन्ना
दित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति भीषास्माद्वातः पवते इत्यादिश्रुतिभ्य
श्च व्यावहारिकभेदोपि स्वीक्रियते कारणीभूतसत्त्वगुणमादाय सर्वचराचरप्रपंचं पालयन्स विष्णुरित्युच्यते
तामसगुणमादायोपसंहरन्स एव रुद्र इति कथ्यते एवं चैकस्यैव ब्रह्मणः परब्रह्मपरमशिवमहाविष्णुवा
सुदेवादिशब्दाभिधेयस्य चतुर्मुखत्वचतुर्भुजत्वपंचमुखत्वरूपाः उमाकाराः वाणीरमोमारूपाः स्त्र्याकाराः लीलाविग्र
हाः तत्र चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पंचमुखाकारो हरस्य वाण्याकारो विधेः रमाकारो हरेः उमा
कारो हरस्य विग्रह इति विशिष्टत्वमस्त्येव गुणत्रयभेदेन तदवच्छिन्नाभेदात् तथा च कथमेक
स्यैव सर्वात्मकत्वमिति चेदुच्यते चतुर्भुजशरीरिणः पालकत्वप्रयोजकं विष्णुत्वमेवेति चक्रमृगाङ्कादेस्संहारादि
रूपस्य तमोऽवच्छिन्नरुद्रकार्यस्यादर्शनात् । तस्य सृष्ट्यादिलक्षणफलकत्वेपि तमःकार्यत्वेन तदवच्छिन्नरुद्रका
र्यत्वात् एवं पंचमुखाकारावच्छिन्नस्येशस्य विष्णुत्वादिदृष्टसंहारत्वेपि केवलरुद्ररूपत्वनिर्णयः संहारस्य देवा
दिपालनफलकत्वेन विष्णुकार्यत्वात् शिवपर्यायः शिवकरः अज्ञानतमसान्मुक्ततारणादीत्यादिषु

स्यामसमोचयतिस्तश्रीतः मोचयामिस्तपकंवेस्यादिसच्च्यावस्तुक्तिज्ञानादिरूपस्यमस्यावच्छिन्नविस्तुकार्यस
प्रतीतेस्तनमूत्तुश्रीतरोहरूमेविनः सात्विकैर्मैनैः मोचयेत्स्यसंश्रमैः हृजयेशमनोहरमिति कौर्मे
नरुद्देमालाहेवेसत्वयोगः प्रतिपादितः एतेनतामसत्वेनरुद्रस्यापकर्षतत्प्रलापोमूर्खाणांनिरस्तः ति
रेतेरेड्डःत्वमयसंसारपरिहतिश्रांतानांजीवानांकेविल्कालेविलेपविराममसमुलसदात्मानंदानुभवेनवि
श्रान्तिंसंपादयितकामस्यतस्यसंहारायतनेमायणस्यद्दृष्टिकितसूर्यणपीडितानांत्राणाशिशामयिघोःशाह
ग्रहणन्यायेननिलानत्वस्याभिषजोकरुणाहिमोश्रयंमतः नकिंचिदपिनेर्घृएपृष्टणेवामप्रयोतिकेतिशिवपु
राणेप्यात्मनेननिरतिशयकरुणामूर्त्यपितल्लिमात् ब्रलकोटेगुणवश्यनासंभवात् निखिलस्यादेस्तमःकु
र्यस्पतयाश्रमिवेदश्च ननुयोगमायेणतमाराववरूपशोकितमणशकनात् प्रत्याख्यातिश्रसंगात् उत्कर्षापकर्ष
भावेश्रुतिस्मृतिविरुणीतत्वस्यप्रतिपादयितुमाशक्यत्वाच्च सर्वोदृष्टतलोब्रहोति विस्तपुराणेब्रह्मणोपिसत्व
गुणयोगेनविस्तत्वप्रतीयते भायतेः तिस्रुद्राणांज्ञानांविधिः कोयास्त्रिनेपसंहारेतसमरणेनरुद्ररूपत्वेषा
वगम्यते वासिष्ठेसत्वेदेवाहरादयः इतिसाम्येनसर्वेषांसुद्गसत्वप्रधानमूर्त्योपाधिनमुक्तं एवंभवान्यादेस्त्रा
दिसंहारेतपिपालनरूपविस्तकार्यतत्प्रतीतेः रुणोभवतिसृक्षयः इतिमायकत्वरूपसमवच्छिन्नकार्यप्रती
तेः महिषासुरवधेरः सत्वगणोत्पादकत्वरूपस्नोवच्छिन्नकार्यप्रतीतेश्चनकेवलरुद्ररूपत्वनिर्णयः न
नुमोलपटनादिकमिदमहालक्ष्म्याउक्तं सावाम्येवसमष्टिरूपेतिमार्कण्डेयश्चयानिकरहस्यतत्त्वतत्त्वा

दे
मा
२
17

हात्म्यालोचनेनत्वत्पक्षे तथा च कथमनेनपार्वत्यामोचकनायुक्तयाविरुद्धादिरूपतोप्यतेरलिवेत्यस्माद्वश्वेती
यते॰ल्पयुक्तानांवक्तृक्रमेनेलूपावतारएवमेतिनिद्रोयते तथाहिमार्कण्डेयेनसामहिषघ्नेमाहिहेत्वेनेद्
युगीनाद्विक चण्डिकामेनत्वंदेहरिवंशेगौर्यांकं तत्रत्वावस्थयुगुल्लेशंवरदेहतायांसर्वमायायांशेवृत्तोवि
नयस्तनः श्रुतिमेकालहंसोभामनुष्टोहेमभूषितः पुराणामनयावत्यादनःपरमेतद्व्या गृहीतायाश्चावे
मंतेमुहूर्तेहेमभूषिते मांपनकरणनामसर्वासुरविनाशिने अनेनदानवौधौवलिनोकामरूपिणो
शुम्भश्चैवनिशुम्भश्चमहाणौसुदितोमयेतिपार्वत्यापार्वत्याएवमसैन्यशुम्भादिहन्तत्वमुक्तं ततःशाक्त
प्रेषितनारदेनमुहूर्तहन्तातेनतुपश्चात्मेघौगौपामनेवीपदिहुपमुतेसनिदेत्येनतस्मिन्नहत्यमाणेमतितेरु
त्यानाहादयार्कान्यानादीन्महोन्मानानंदस्तुवश्च्युतः शुम्भप्रियाहहिमद्वानाभूमौशिरस्त्वाश्रणम्ययतद्वाव
श्रेनमःकामायमेयगुहस्पजनन्यैनमः नमस्त्रिलोकमायायैकामायत्यैनमोनमः नमस्तेशुम्भमथनीनिशु
म्भहन्त्रिहारिणी विन्ध्यवासिनीदुर्गेचारणादुर्गतारिणीप्रिया त्रिशूलिनीनमस्यामिमहिष्यासुरघातिनी सिं
हवाहनेनमस्यामीत्यादिनामध्यमोनमधारेनोक्तंसर्वेगुहमालाविषयमुपपादित प्रथमचरितदेवतातु
